ङीषिति घञ्। टाप्।) अध्यापिका। विद्योपदेष्टिनी। इत्यमरः॥

उपाध्यायानी, स्त्री, (उपाध्यायस्य पत्नी॥ "मातुलोपाध्याययोरानुक् वा" इत्यानुक्।) उपाध्यायपत्नी। इत्यमरः॥ (यथा महाभारते १।३।९६। "स एवमुक्त उपाध्यायेनोपाध्यायानीमपृच्छत्"॥)

उपाध्यायी, स्त्री, (उपाध्यायस्य पत्नी। आनुगभावपक्षे सिद्धम्।) अध्यापकभार्य्या। इत्यमरः॥

उपानत्, [ह्] स्त्री, (उपनह्यते पादावनया। उप+नह्+क्विप्। "नहिवृतिवृषीति"। ६।३।११६। पूर्व्वपदस्य दीर्घः।) चर्म्मादिनिर्म्मितपादकोषः। जुता इति भाषा। तत्पर्य्यायः। पादुका २ पादूः ३। इत्यमरः॥ पादव्यतिरेकेणात्मोपानद्वहननिषेधो यथा,—

"नाद्यैः क्रीड़ेत् कदाचित्तु स्वयं नोपानहौ वहेत्।
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने"॥

इति मानवे ४। ७४॥ "गलहं विना कदाचिदपि परिहासेनापि नाक्षादिभिः क्रीड़ेत्। स्वयमित्यभिधानात् आत्मोपानहौ पादव्यतिरिक्तेन हस्तादिना देशान्तरं न नयेत्। शय्यावस्थितश्च न भुञ्जीत हस्ते च प्रभूतमन्नं कृत्वा क्रमेण न खादेत्। आसने भोजनपात्रं निधाय न भुञ्जीत। इति तट्टीकायां कुल्लूकभट्टः॥ (यथा नैषधे।१।१२३।

"कृतावरोहस्य हयादुपानहौ"।

"अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत्।
पादाभ्यामनुपानद्भ्यां सदा चंक्रमणं नृणाम्"॥

इति सुश्रुते चिकित्सितस्थाने २४ अध्यायः॥)

उपान्तः, त्रि, (उपगतोऽन्तात्।) निकटम्। इति हेमचन्द्रः। ("दिशामुपान्तेषु ससर्ज वृष्टिम्"। इति कुमारे ३।६९। "उपान्तवानीरगृहाणि दृष्ट्वा"। इति रघुः१६।२१। "शय्योपान्तनिविष्टसस्मितमुखी"। इति साहित्यदर्पणे ३य परिच्छेदे॥)

उपायः, पुं, (उपाय्यतेऽनेन। उप+अय+घञ्।) राजादीनां शत्रुवशीकरणहेतुचतुष्टयम्। यथा। साम १ दानम् २ भेदः ३ दण्डः। इत्यमरः॥ उपगतिः। इति मेदिनी॥ स्वार्थसम्पादकः। साधनम्। यथा,—

"उपायतः समारम्भाः सर्व्वे सिध्यन्त्युपक्रमाः।
उपायं पश्य येन त्वं धारयेथाः प्रजा नृप"॥

इति वह्निपुराणे पृथूपाख्याननामाध्यायः॥ ("उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"। इति हितोपदेशे। तथा, माघः २।५४।

"चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया"।

"सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः"।

इति मनुः ७।१७७। चेष्टा। यत्नः।

"यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः"।

इति मनुः ८।४८।

"अध्ययनमध्यापनं तद्विद्यासम्भाषेत्युपायाः"।

"उपायः पुनः कारणादीनां सौष्ठवमभिधानं च सम्यक् कार्य्याकार्य्यफलानुबन्धवर्ज्यानां कार्य्याणामभिनिर्व्वर्त्तकः इत्यतोऽप्युपायः कृतेनोपायेनोऽस्ति न च विद्यते तदात्वे कृताचोत्तरकालं फलं फलञ्चानुबन्ध इति जातं दशविधम्"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपायनं, क्ली, (उपेयते उपाय्यते वा। उप+इण वा अय+ल्युट्।) उपहारः। उपढौकनद्रव्यम्। इत्यमरः॥ (यथा, कुमारे।२।३७।

"तस्योपायनयोग्यानि रत्नानि सरितां पतिः"।)

व्रतादिप्रतिष्ठा। इति स्मृतिः॥ समीपगमनम्॥ (यथा ऋग्वेदे२।२८।२।

"उपायन उषसां गोमतीनाम्"॥)

उपार्ज्जनं, क्ली, (उप+अर्ज्ज+ल्युट्।) अर्ज्जनम्। धनाद्याहरणम्। (यथा, रामायणे।५ काण्डे।

"शस्त्राणां सरथानाञ्च कृत्वा सम्यगुपार्जनम्"।)

"सत्त्वहेतुभूतव्यापारः"। इति स्मृतिः॥

उपालम्भः, पुं, (उप+आ+लभ्+घञ्। "उपसर्गात् खलघञोः" इति नुम्।) दुर्व्वाक्यम्। इति हलायुधः॥ स च गुणाविष्करणेन स्तुतिपूर्व्वकः। यथा, महाकुलस्य भवतः किमिदमुचितमिति। निन्दापूर्व्वकश्च। यथा बन्धकीसुतस्य भवतस्तदिदमुचितमिति भागुरिः। इत्यमरटीकासारसुन्दरी॥ ("उपालम्भो नाम हेतोर्दोषवचनं यथापूर्व्वमहेतवो हेत्वाभासा व्याख्याताः"। इति चरके विमानस्थाने ८ अध्यायः॥)

उपावृत्तः, त्रि, (उप+आ+वृत्+क्त।) श्रमशान्त्यर्थं पुनःपुनर्भूमौ लुठिताश्वः। इत्यमरः। निवृत्तः। तथाचैकादशीतत्त्वे।

"उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्व्वभोगविवर्ज्जितः"॥

उपासकः, पुं, स्त्री, (उपास्ते सेवते यः। उप+आस्+ण्वुल्। द्विजातिसेवकत्वादस्य तथात्वम्।) शूद्रः। इति राजनिर्घण्टः॥

उपासकः, त्रि, (उपासते इति। उप+आस्+ण्वुल्।) उपासनाकर्त्ता। (यथा, वेदान्ते।

"चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः।
उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"॥)

स च पञ्चविधः। वैष्णवः १ शाक्तः २ शैवः ३ सौरः ४ गाणपत्यः ५। त्रिविधश्च यथा। दिव्यः १ वीरः २ पशुः ३। इत्यागमः॥ अपि च। सात्त्विकः १ राजसिकः २ तामसिकश्च ३॥

उपासङ्गः, पुं, (उपासज्यन्ते शरा यत्र। उप+आङ् सञ्ज+घञ्।) तूणीरः। इत्यमरः॥ (यथा, महाभारते ४। उत्तरस्य अस्त्रदर्शने ४०।६।

"इमे च कस्य नाराचा सहस्रं लोमवादिनः।
समन्तात् कलधौताग्रा उपासङ्गे हिरण्मये"॥)

उपासनं, क्ली, (उपास्यन्ते क्षिप्यन्ते शरा यत्र। उप+अस क्षेपे+अधिकरणे ल्युट्। शुश्रूषादिपक्षे आस भावे+ल्युट्।) शराभ्यासः। (यथा रामायणे।२।६७।२१।

"भूयते तलनिर्घोष इष्वस्त्राणामुपासने"।)

शुश्रूषा। इत्यमरः॥ ("नित्यनैमित्तिकप्रायश्चित्तोपासनेन"। "उपासनानि शाण्डिल्यविद्यादीनि"। इति च वेदान्तसारे।) विहिंसनम्। इति विश्वः॥ आसनम्। इति मेदिनी॥ ("मङ्गल्योपासनं शस्तं हृद्यं व्यसनापहम्"। इति चक्रपाणिदत्तद्रव्यगुणे गुणानां क्रियाभिधानादिवर्गे॥)

उपासना, स्त्री, (उपासनमिति। उप+आस+युच्+टाप्।) सेवा। तत्पर्य्यायः। वरिवस्या २ शुश्रूषा ३ परिचर्य्या ४ उपासनम् ५। इत्यमरः॥

("न विष्णूपासना नित्या वेदेनोक्ता तु कुत्रचित्।
न विष्णुदीक्षा नित्यास्ति शिवस्यापि तथैव च॥
गायत्र्युपासना नित्या सर्व्ववेदैः समीरिता।
यया विना त्वधःपातो ब्राह्मणस्यास्ति सर्व्वथा॥
तावता कृतकृत्यत्वं नान्यापेक्षा द्विजस्य हि।
गायत्रीमात्रनिष्णातो द्विजो मोक्षमवाप्नुयात्॥
कुर्य्यादन्यन्न वा कुर्य्यात् इति प्राह मनुः स्वयम्।
विहाय तान्तु गायत्रीं विष्णूपास्तिपरायणः॥
शिवोपास्तिरतो विप्रो नरकं याति सर्व्वथा।
तस्मादाद्ययुगे राजन् गायत्रीजपतत्पराः॥
देवीपादाम्बुजरता आसन् सर्व्व द्विजोत्तमाः"॥

इति श्रीदेवीभागवतम्॥

यद्यपि ईश्वरे न हि तस्य सर्व्वैश्वर्य्यवत्त्वात् सर्व्वतः पूर्णकामत्वाच्च उपासनयाप्लमिति वाच्यम्। यतः सर्व्वेषामपि भूतजातानामविदितात्मतत्त्वानामपि स्वस्रोतत्त्वादिकारणे अलक्षितत्वेनापि प्रीतिरिति नैसर्गिकी वृत्तिरेव। परं यदि च रजस्तमोभ्यामन्धीभूतानां सुतरामात्मानात्मविवेकविहीनानामज्ञमनुष्याणामविद्याकामकर्म्मकलुषीकृते चित्ते नित्यमुक्तशुद्धबुद्धस्वभावः प्रशान्तविमलज्योतिःस्वरूपः स सर्व्वभूतान्तरात्मा न सम्यक् प्रतिभाति। तथा च आत्मस्वरूपमजानन्नपि सर्व्वोऽपि जनः स्वभावतएव परमप्रीत्यात्मानं भजते नोचेत् कथमात्मज्ञानविमूढ़ोऽपि अनेनैव मे श्रेयो भविता अस्मिन् कृतेऽहं सुखी भवेयम् इत्याकारेण सर्व्वथा आत्मसुखोत्पादनाय प्रयतते? तस्य सर्व्वान्तरात्मत्वात् सर्व्वैरपि जीवैः सह नित्यसम्बन्धवत्त्वाच्च। यद्यपि तस्मिन् नित्यानन्दस्वरूपे भगवति परमेश्वरे एकान्तप्रीतिकरणमेव तदुपासनं तथापि सर्व्वलोकमोहप्रदायिन्यां ज्ञानावरणकारिण्यामविद्यायां सत्यां कुतः सा सर्व्वसुखप्रदा तापत्रयच्छेत्री परमा प्रीतिरनुभवनीया? अतस्तस्या आत्मज्ञानविलोपिन्या मलिनसत्त्वगुणाया रजस्तमःप्रधानाया अविद्यायाः प्रणाशनार्थमेवावश्यमुपासना करणीयेति सर्व्वेषामपि शास्त्राणां सारमतमिति बोध्यम्। परन्तु सबलदुर्ब्बलाद्यधिकारिभेदेन उपासनाया अपि प्रभेद उपदिष्टस्तत्त्वदर्शिभिः। यदि च मनुष्याणां निःश्रेयसार्थं बहवः पन्थानः स्वमतानुसारेण शास्त्रकृद्भिरुपदिष्टास्तत्रापि आत्मज्ञानमेवाविद्यानाशनायालमिति वेदान्त-भगवद्गीता-पातञ्जल-साङ्ख्यादिज्ञानशास्त्रोपदेष्टॄणां प्रशस्तमतमित्येव दृश्यते। वस्तुतस्तु तज्ज्ञानमेव मुक्तेः साक्षात्कारणमित्यत्र नैव केषाञ्चिदपि संशयावसरः। किन्तु नैव योगाभ्यासादृते प्रायेण तत्त्वज्ञान-